INTERNATIONAL JOURNAL OF MULTIDISCIPLINARY EDUCATIONAL RESEARCH
ISSN : 2277-7881
VOLUME 1, ISSUE 3, AUG 2012

# भारतीयं वैदिकवाङ्मयम् – तत्संरक्षणोपायाः

**Dr. P. Swapna Haindavee,** M.A., Ph.D.,
Principal (FAC),
M.R.Govt. Sanskrit College, Vizianagaram

**"सम्भवति दृष्टफले अदृष्टफलकल्पना अन्याय्या"** इति जैमिनीयनयः । अत एव **"स्वाध्यायोऽध्येतव्य"** इति अध्ययनविधेः फलम् अर्थज्ञानमिति निश्चीयते । तथाहि **"अथाते धर्मजिज्ञासा"** इत्यत्र अतः इति शब्दस्यार्थं - **"अर्थज्ञानरूपदृष्टार्थत्वात्"** इति व्याचक्षते मीमांसकशिरोमणयः । **"निष्कारणेन ब्राह्मणेन षडङ्गोवेदोऽध्येयो ज्ञेयश्च"** इति श्रुतिवाक्यमपि अमुमेवार्थं संगिरते । **"स्थाणुरयं भारहर किलाभूदधीत्य वेदं न विजानाति योऽर्थम्"** इति, किञ्च **"योऽर्थज्ञ इत् सकलं भद्रमश्नुते"** इत्यादीनि उच्चावधानि वचनानि अध्ययनविधेः तात्पर्यम् अर्थज्ञानपर्यन्तं नयन्ति ।

तच्चार्थज्ञानं महर्षिभिः तत्कल्पैः लोकानुकंपापरायणैः विरचितानि भाष्यान्तराणि दुष्प्रापम् । विरलाः वेदाध्यापकाः । विरलतराश्च तद्भाष्याध्यापकाः । यथा वेदाध्ययने ह्रासः दरीदृश्यते ततोप्यधिकतर ह्रासः तद्भाष्याध्ययने विलोक्यते । अत्र कारणं श्रद्धाभाव एव । अस्मादेव हेतोः बह्व्यः वेदशाखाः कालगर्भे अलीयन्त ।

ऋग्वेदस्य एकविंशतिशाखाः आसन् । सम्प्रति तु शाकल-बाष्कल-नामिके द्वे एव शाखे उपलभ्येते। यजुर्वेदस्य एकोत्तरशतशाखासु केवलं काण्व-माध्यन्दिन-तैत्तिरीय-मैत्रायणीय-काठ-कपिष्ठलकठशाखाः विराजन्ते । तत्रापि अनन्तरोक्ताः तिस्रः शाखाः पुस्तकेष्वेव जीवन्ति, न तु अनादिकल्पारम्भानां प्रवृत्तानाम् अध्ययनाध्यापनानां परम्पराप्रवर्तकानां दुष्करविषयमहासागरसन्तरणपोतायमानधैर्याणां निरपेक्षाणां वेदमयजीवितानां ब्रह्मवादिनां रसनाग्रेषु । एवमेव सहस्रवर्त्मनः साम्नः सकाशात् केवलं तिस्रः शाखाः

कौथुम-जैमिनीय-राणायनीयाख्याः प्राप्नुमः । तथैव अथर्ववेदस्य २७ शाखानां मध्ये केवलं शौनक-पैप्पलादशाखे च द्वे एव उपलभ्येते । इत्यहो कीदृशी दुर्गतिमवाप्ताः भारतीयाः । न्यूनातिन्यूनं विद्यमानानां वेदशाखानां संरक्षणाय कटिबद्धैर्भाव्यमस्माभिः । तदर्थं तत्तच्छाखानां शब्दानुपूर्वीग्रहणपुरस्सरं तदर्थपरिज्ञाने विशेषपरिश्रमो विधेयः ।

वेदार्थस्य उपबृह्मणायैव निखिलमितरद्वाङ्मयं सम्प्रवर्तते । वेदाङ्गतया प्रसिद्धाः शिक्षा-व्याकरण-छन्दो-निरुक्त-ज्योतिषाः लोके प्रथन्त्येव, तद्वदेव षडास्तिकदर्शनान्यपि वेदविज्ञानं विवृण्वन्ति । अतः तेषामपि परिचयः वेदभाष्याध्ययने, अध्यापने वा गुणवत्तां वर्धयति । सामान्यसंस्कृतज्ञः यदि वेदार्थनिर्णये उपक्रमेत तर्हि पदे-पदे स्खलनं ध्रुवम् । लोके **न** इति शब्दः निषेधवाचितया प्रसिद्धः । वेदे तु सः इववाचकः। लोके अरिष्टशब्दस्य यो अर्थः वेदे तद्विपरितः । अतः वेदाङ्गानां दर्शनानां च ज्ञानं विना वेदार्थज्ञानाय प्रयासः साहसकर्म भवेत्, कदाचित् स्वरवशात् समासनिर्णयः क्रियते । समासनिर्णयद्वारा अर्थनिर्णयो भवति । स्वरविषयकपरिज्ञानाभावे प्रमादाद्दुरर्थबोधो जायते । अत एवोक्तम्- **"बिभेत्यल्पश्रुताद्वेदो मामयं प्रहरिष्यति"** इति । अतः साङ्गो वेद एव अध्येयः ज्ञेयश्च । अङ्गाध्ययन-पूर्वकं विहितमेव वेदभाष्याध्ययनं गुणवद्भवति । उक्तं च **"तस्मात् साङ्गमधीत्यैव ब्रह्मलोके महीयते"** इति ।

**अनुसन्धेयप्रधानांशाः**

ऋग्वेदे शाकलमन्त्रसंहिता प्राप्यते, परन्तु तदीयं ब्राह्मणं तु न प्राप्यते, अतः ब्राह्मणमन्वेष्टव्यम् । ऐतरेयं ब्राह्मणं तु प्रप्यते, परन्तु तदीया मन्त्रसंहिता न प्राप्यते, अतः मन्त्रसंहिता अन्वेष्टव्या । आश्वलायनमन्त्रसंहिता पाण्डुलिपिरूपेण राजस्थान-प्राच्यविद्या-प्रतिष्ठाने प्राप्यते, तत्प्रकाशनाय तदनुसन्धानञ्च नितरामपेक्षते ।

वैदिकसाहित्येतिहासाध्ययनेन ज्ञायते यत् कठसंहिता अंशात् प्रप्यते, ब्राह्मणम् आरण्यकं तु न प्राप्यते, उपनिषद् प्राप्यते, रोमनलिप्यां कठारण्यकं तु दृश्यते, तस्य देवनागरी लिप्यां पुनारचनीयं वर्तते ।

यजुर्वेदे-शुक्लकृष्णविभागः वर्तते, तत्र शुक्लयजुर्वेदे काण्वमाध्यान्दिनीयमन्त्रसंहिता, ब्राह्मणभागश्च प्राप्यते, तद्वत् अन्यासां भागानामपि मन्त्रसंहिता ब्राह्मणभागः अन्वेष्टव्यः । कृष्णयजुर्वेदेऽपि तैत्तिरामैत्रायणीशाखामतिरिच्य अन्यासां वेदभागानां मन्त्रसंहिता ब्राह्मणभागश्चान्वेष्टव्यः । सामवेदे – कौथुमी-जैमिनीमन्त्रसंहिते तु प्राप्येते, राणायनीयशाखा केवलं काश्यामेव सुरक्षिता, सापि केवलोच्चारणपरम्परीया, न तस्याः संहिता प्राप्यते। ब्राह्मणग्रन्थाः प्राप्यन्ते, परन्तु संहिता न तथा।

अथर्ववेद-शौनकशाखा, गोपथब्राह्मणं तु प्राप्यते, परन्तु पैपल्लादसंहिता न प्राप्यते, अंशतः प्राप्यते इति तु उल्लिख्यते । श्रूयते यत् काश्मीरनरेशेन कस्मैचित् जर्मनीविदुषे पैपल्लादसंहितायाः पाण्डुलिपिः प्रदत्ता सा रोमनलिप्यां प्रकाशिता, तद्देवनागरी लिप्यां प्राकाशनीया।

**गुणात्मकदिशानिर्देशाः**

जैमिनिसूत्रानुसारं यथा ब्राह्मणग्रन्थानां व्याख्यानं जातं, ब्रह्मसूत्रानुसारं यथा उपनिषदां व्याख्यानं जातं, तथैव योगानुसारं सांख्यसूत्रानुसारं ब्राह्मणोपनिषदां व्याख्यानमपेक्षितं विद्यते । अत्र दर्शनशास्त्रे अनुसन्धित्सूनां कृते भूयान् विषयविस्तरो निर्देष्टुं शक्यते।

अथर्ववेदे नादबिन्दु-उपनिषद्, योगबिन्दु-उपनिषद् उपलभ्येते, एतासामपि उपनिषदां योगानुशासनस्य व्याख्यानम् उपलभ्यते।

**पद्धतिग्रन्थाः**

अग्निहोमपद्धतिः प्रतिशाखं प्रकाशनीयतामर्हति, अद्यावधि न कापि प्रकाशिता, तथैव दर्शपूर्णमासपद्धतिः, भीभसेलचं, नित्याननुपर्वतो उपलभ्यते, परन्तु तत्र भूयान् भेदो दृश्यते, तथापि तुलनात्मकममध्ययनं सुतरामपेक्षते । एवमेव अश्वमेध-राजसूय-वाजपेय-वैश्यस्तोमयज्ञानां पद्धतयः सानुसन्धानं प्रकाशनीयतामर्हति।

**विकृतिपाठप्रकाशनम्**

पञ्चसन्धिकपुत्रकविकृतिपाठाः श्रूयन्ते, श्रवणपरकीयाः परन्तु लिपिबद्धाः न क्वचित् प्रकाशिताः, एवं विकृतिपाठानामपि प्रकाशनमपेक्ष्यते।

**सामगानभेदाः**

कौथुमीयशाखीयगानमपि द्विधा विभज्यते । भद्रपद्धतिः गुर्जरपद्धतिश्चेति । अत्र गेयतायां का हेतुलिपिरिति चिन्तनीयम् अनुसन्धानमुपगच्छति । एवं गायनं स्तोत्र-वैराजीतीयभिणवस्तोमादि अनेकविधस्तोमानां काचन विशिष्य विष्टुतयः सामवेदीयब्राह्मणग्रन्थेषु स्तरं सामगानानां तद् विष्टुमे प्रकाराणाञ्च अनुसन्धानं प्रकाशनं नितरामपेक्षते।

**परिशिष्टप्रकाशनम्**

अथर्ववेदीयानि कानिचन परिभिष्टानि अद्य रोमनलिप्यां प्राप्यन्ते, तत्र लोकहितकाव्यानि नैकविध कर्माणि निर्दिष्टानि सन्ति, तासामपि लिपीनां देवनागरीलिप्यां प्रकाशनमपेक्ष्यते साम्प्रतम्।

**पाण्डुलिपिसग्रहः -**

दक्षिणभारते विदुषां गृहे अद्यापि काश्चनपाण्डुलिपयः सुरक्षिताः सन्ति, तेषामध्ययनाध्यापनमपि श्रुतिपरम्परीया प्रचलति, परन्तु तेषामभावे कदाचित् सा परम्परापि लुप्ता भविष्यति, अतः तेषां यथायोग्यं पाण्डुलिपयः संग्राह्याः तथा तासां सानुसन्धानं प्रकाशनयोजनाऽपि चिन्तनीया।

**भाष्यविरभनम् -**

कृष्णयजुर्वेदस्य मैत्रायणी-संहितायाः भाष्यं नोपलभते। मन्त्रसंहिता ब्राह्मणग्रन्थाः उपलभ्यते, तस्याः यथा प्रामाण्यं भाष्यं करणीयं भवति, अत्रापि अनुसन्धानाय भूयांसः विषयाः वर्तन्ते। क्वचित् श्रूयते यत् सामवेदीयकौथुमीशाखायाः सायणभाष्यमप्यस्ति। भगवदाचार्यस्यापि भाष्यं कदाचित् तुलनायामासीत्,

परन्तु नेदानीमुपलभ्यते, तत् न सायणवत् यागीयव्याख्या आसीत्, अपितु वैष्णवसम्प्रदायानां तथापि एवमनेकेषाम् आचार्याणां मतानुसारं तस्य तुलनात्मकमध्ययनमपि अपेक्ष्यते।

## उपसंहारः

इत्थं विपुलं संस्कृतवाङ्मयं यद्यपि श्रुतिपरम्पराया सहस्रवर्षाणि यातव् प्रचलितमासीत् गुरुपरम्परया मुखामुखम्। किन्तु मध्यकाले नैकैः कारणैः सा परम्परा कुण्ठिता सञ्जता। सम्प्रति तस्याः परम्पराः पुनरुज्जीवनाय अस्माभिः भारतीयैः सर्वैः विशेषप्रयोसो विधेयः। तदर्थं कतिचन कार्याणि अत्र उपनिबद्धानि। एतानि कार्याणि दिङ्मात्रं निर्दिष्टानि। इतोऽपि कर्तव्यानि कार्याणि विद्यन्ते। तदर्थं प्रयतामो वयम्। इति शम्।

## उपसंहारः

1. **पं. भगवद्दत्त, वैदिक वाङ्मय का इतिहास, भाग 1, डी. सी. नारंग हिन्दी भवन् प्रेस, लाहोर, पञ्जाब।**
2. **पं. भगवद्दत्त, वैदिक वाङ्मय का इतिहास, भाग 2, डी. सी. नारंग हिन्दी भवन् प्रेस, लाहोर, पञ्जाब।**
3. **डा. कपिलदेव द्विवेदी, वैदिक साहित्य एवं संस्कृति, विश्वविद्यालय प्रकाशन, चौक, वारणासी।**
4. **बलदेव उपाध्याय, संस्कृत साहित्य का इतिहास, हिन्दू विश्वविद्यालय, वारणासी।**
5. **डा. मङ्गलदेव शास्त्री, संस्कृत साहित्य का इतिहास, मोतीलाल बनारसीदास, वारणासी।**